श्रीगणेशायनमः॥नारदउवाच॥अथातःसंप्रवक्ष्यामिमाहात्म्येपरमद्भुतं॥त्रक्ष्म
णस्यगिरेर्दिव्येवरूणस्यमहात्मनः॥१॥कुंदनामाऋषिर्गणेधर्मकर्मरतस्स
दा॥शिवसेवापरोनित्यंमहदैश्वर्य्यसंयुतः॥२॥एकदासोशिवंगणेवनंपुष्पा
यसंययौ॥अशवक्रमुनेःपार्श्वेमृगमेकंजघानह॥३॥दृष्ट्वामुनिवरस्तत्रचुको
पक्रोधसंकुलः॥पिशाचत्वंव्रजशीघ्रंतेनशप्तःप्रतापिना॥४॥पिशाचत्वं
गतशीघ्रंजगामविपिनंमहत्॥त्रमन्वैकल्पतायुक्तोमहद्भिरिवनंसरित्५

indianmanuscripts.com

तेनदृष्टोगिरींद्रेसोवांधवोतिप्रभावतः॥तस्यमुक्तोमहाशापोजगामस्वगृहंततः॥
सर्वानशिवगणान्नत्वाप्रणम्यशंकरंशिवां॥संदृष्टोहृष्यादेव्याकुत्रमुक्तो
सिशापतः॥७॥नत्वातांगिरिजांकुंदसंस्तुत्योवाचसादरं॥वरुणश्चलस
शैनमुक्तोहंमुनिशापतः॥८॥श्रुत्वाश्रीशंकरंदेवंनत्वोवाचशुभानना॥
देवकुत्रास्तिये नासौवांधवेनातिभ्युद्धितः॥९॥मुनींद्रस्यमहत्कोपान्मु
क्तोयस्यप्रभावतः॥देवोवामानुषोवापिगिरिरूपेलवर्तते॥१०॥अत्य

द्भुतंमहापुण्यंदर्शनंयस्यदृश्यते॥देवोवातत्रकोप्यस्तिकिंतीर्थंतत्समास
तः॥११॥वदस्वसुमहाभागसर्वसर्वज्ञसर्वग॥संशयोहृियदादेव्याश्चंक
रोमुनिसत्तमाः॥१२॥वचसाश्रीलायंदेवीमुवाचवदतांवरः॥श्रृणुदेविम
हापुण्यपवित्रंपापनाशनं॥१३॥माहात्म्यगिरिवर्य्यस्यलक्ष्मणस्यचधीम
तः॥पुरासीद्राक्षसश्रेष्ठोरावणोनामविश्रुतः॥१४॥तेनसर्वंजितंलोकंस
देवासुरमानुषं॥एकदाविचरन्लोकान्जगामवैस्वयंप्रदं॥१५॥तत्रासीद्दि

indianmanuscripts.com

स्मुनादेवियुद्धंतस्यशार्ङ्गं॥गदयाताडितोरक्षःचक्रेणक्षुरनेमिना॥१६॥पुनः
पुनःस्वचक्रेणताडयन्नमतोयदा॥नश्रांतोनिदुराप्यवैरावलोलोकरावं
णः॥१७॥तदातिशंकितोविस्मुर्ब्रह्मोवाचहरिंप्रति॥सर्वदेववलाद्ध्रोयं
वरदानेनगर्वितः॥१८॥नमरिष्यतिदेवेशमत्युरस्यरघूत्तमात्॥त्यक्तो
ब्रह्मणाविस्मुस्तत्रैवांतर्धीयत॥१९॥पुनर्ब्रह्मारघुश्रेष्ठंसंपूज्यस्तुत्यसं
स्तवैः॥ब्रह्मणास्मरणाद्रामोब्रह्मांतिकमुपागतः॥२०॥वरंब्रूहिप्रदास्या

indianmanuscripts.com

मिस्ये-छ्यादेवसत्तम॥रावणं जहिदुर्द्धर्षंसर्वलोकोपतापनं॥२१॥इत्युक्तो ब्रह्मणारामस्तस्मैप्रादाद्वरंमहत्॥विधेप्रार्थनयारामोजातःसाजोमनोः कुले॥२२॥सेवनायास्यसंजातादेवासर्वेससक्तिकाः॥वैकुंठश्चस्तुसर् तोक्षीराब्धीश्चश्चलक्ष्मणः॥२३॥शत्रुघ्नस्तुस्वयंभूमारामसेवार्थसं गतः॥अयोध्यायांतुयेजाताःसर्वेतेविष्णुरूपकाः॥२४॥सेवांकुर्वंतिनित्यंहिराघवस्यप्रहात्मनः॥समाप्यसर्वेकर्माणिवधंकृत्वातुरक्षसांगरं॥५॥

indianmanuscripts.com

राज्यं चकार धर्मेण महाराजो रघूत्तमः॥ तत्रैकदा विप्ररूपो जगत्संहारकारकः॥२६॥ कालोभ्यगान्महादेवि रामं प्रतिवचोब्रवीत्॥ प्रतिज्ञां कुरुकार्यस्थ योस्मिन्मंत्रेगमिष्यति॥२७॥ सतेवध्योभवेद्रामाश्रुत्वा सौमित्रिरब्रवीत्॥ द्वारितिष्ठात्रसौमित्रेनकोप्यायान्मदंतिके॥२८॥ मंत्रकालेममाग्रे त्सवध्योमेनसंशयः॥ प्रतिश्रुश्रुत्यंगतोमंत्रंतत्रैकोह्यन्यगाद्द्विजः॥ रामःकुत्रास्तिसौमित्रेदर्शयास्वक्षुधार्दितः॥नोचेत्वांनाशयिष्या

मित्रसुत्रवत्सबांधवं॥३०॥विदितःपूजीतोप्यवंनतुष्टोद्विजसत्तमः॥
क्षणंप्रतीक्षविप्रर्षेनश्रुतंतेनतद्वचः॥३१॥सर्ववंशक्षयंचिंत्यत्रयं
तत्रागेगामहं॥रामोप्यागत्यतंपूज्यलक्ष्मणंनोनिरीक्षते॥३२॥रा
मंप्रोवाचसौमित्रिजहिमांराजसत्तम॥सत्यप्रतिज्ञंतच्छ्रुत्वानि
र्गच्छासुगुह्यद्रुतं॥समंत्यक्तुस्तुसौमित्रिर्ब्रह्मकुंडनिमज्यच॥स
जेद्राजतनुंतत्रस्वस्वरूपंगतस्तदा॥३४॥संक्षुब्धचित्तोदुःखंतद्राम

indianmanuscripts.com

त्नीलांमनोहरं॥सुमुत्सुकोमुनिंतत्रददर्शगौतमंप्रभुः॥३५॥तस्मैपप्र
च्छमत्राहंस्थित्वापश्येरघूत्तम॥दिव्यंमनोहरंपुण्यंस्थानंपापहरंव
द॥३६॥श्रुत्वोवाचमुनीशस्तुसौमित्रेवांधवंव्रज॥पुण्यामनोहरः
साक्षाद्वरूणोगिरिरूपकः॥३७॥मुनिंनत्वारघुश्रेष्ठवचनंचेदम्
ब्रवीत्॥दिगीशोवरूणोदेवःकुतोयंगिरिरूपकः॥३८॥माहात्म्यं
तस्यचोत्पत्तिंविस्तराद्वदमेप्रभो॥श्रुणुवत्सप्रवक्ष्यामिपुराब्रह्मा

indianmanuscripts.com

स्वपुत्रकैः ॥३९॥ देवैः परिवृतोयज्ञंपुष्करेचारभद्विभुः ॥ सरस्वतीचसा
वित्रीगायत्रीब्रह्मणाःस्त्रियः ॥ सरस्वतीचसावित्रीसरज्यांस्नातु
मागता ॥ यज्ञदीक्षामुहूर्ततुसंप्राप्तंद्विजसत्तमाः ॥ ४१ ॥ श्रुत्वातत्रा
स्तिगायत्रीतयायज्ञंसमारभत् ॥ किंचित्कालेनसायाताद्दृष्ट्वातांक्रो
धमूर्छिता ॥ ४२ ॥ कनीयसीयंमेदेवायायज्ञंसमारभत् ॥ अव
मान्यचमांज्येष्ठांत्यत्कायद्विपरंपरां ॥ ४३ ॥ अतोजत्वंशैलत्वंया

indianmanuscripts.com

तस्सर्वे विवेकिनः॥ तयाशक्त्या द्विजादेवा जाता नदि सिलात्मकाः॥४२॥ स
रस्त्यीच सावित्री शक्त्यादेवान्सशक्तिकान्॥ सावित्र्यपि चगायत्र्या
शक्त्यान्तर्धानतांगता॥४५॥ तेषांसशक्तिकोदेवो जलेशोरिंगितां
गतः॥ विध्यनाभिसमुद्भूतो जलेशोवांधवाचलः॥४६॥ वांधवी
तिसमाख्याता जलेशस्त्रीपतिव्रता॥ तस्यसंसेवनार्थायस्यादेवा
श्चिस्समागतः॥४७॥ तस्यपदतलंसेवेत्सर्वपादोगशैर्वृतः॥ मणि

indianmanuscripts.com

कूटगिरिस्तस्य पार्श्वे प्रासोधिकेन्तिके॥४८॥भद्रकूटोदेवकूटोम
हेंद्रोमंदरोगिरिः॥संवर्त्तकोलक्ष्मिकूटो जयकूटोतिधर्मकुक्कः॥४९
यज्ञकूयेमहाकुरसेवंतेवरुणंमुहुः॥विष्णुर्वराहोमत्स्यश्चकूर्मोन
हरिरेवच॥५०॥भार्गवोवामनोदेत्यवर्य्योदेवगणास्सदा॥शिवस्था
शक्तिकास्तीर्थानद्यानद्यश्चसागराः॥५१॥तस्यवाह्यांतरेप्रासा
जंगमाजंगमामयाः॥अत्रिपुत्रोतितेजस्वीचंद्रस्तत्रमहातपः॥५२॥

indianmanuscripts.com

बहुवर्षसहस्रंतु तत्रोषित्वरंतभेत्॥धाधवेभिस्तुतश्चंद्रो राज
सूयंमहाक्रतुं॥५३॥चक्रेदेवगणैस्साद्धंजेशत्वंतदात्तभेत्॥तुष्टस्तदेवगणान्स
प्राचेद्रोनम्यत्यवाचतान्॥५४॥अत्रदेवगणास्सर्वेसदातिष्ठतसांप्रतं॥त
स्मेदघुर्वरंसर्वेस्थातव्यंस्माभिरत्रवो॥५५॥वरंदत्वंदवेदेवाजग्मुस्वंस्वंप
रंपदं॥तावत्प्रभृतिदेवेंद्रावाधवेसंतिसर्वदा॥५६॥तत्रनेत्रवतीगंगावा
धवस्योदरेवसत्॥स्नात्वास्याह्लोदधौदेवंकुल्यांब्रह्मसरोवरे॥५७॥

indianmanuscripts.com

गिरेः प्रदक्षिणंकुर्य्याद्यातिविप्रेः परंपदं॥पुराविप्रगणैराजन्मत्सरादेवकोपतः॥५८॥
गोहत्याप्रविसत्तिस्रामिथ्यावादेनतेरहं॥हत्यामुक्तेकोटिलिंगपूजनंपार्थिवं
द्विजैः॥५९॥शतंप्रदक्षिणंभूमेस्ततस्तेशुद्धितांद्विज॥महच्छोकतरुंशंभुपूजां
कुर्य्यान्महंतया॥६०॥तुष्टःशंभुरुवाचेदंसर्वहत्याविनाशनं॥वरुणाद्रिस्त
तोविप्रयाहितस्यप्रदक्षिणं॥६१॥कृत्वास्नात्वाथदृष्ट्वातंमुक्तोहत्याश
तैर्विभो॥गत्वाहंतस्यसंस्पर्शान्मुक्तोहत्यावलेनच॥६२॥अतोगच्छमाह

indianmanuscripts.com

भागशैलं द्रवाधवाचले॥चित्रकूटगिरेर्याम्ययोजनद्वादशांतरे॥६७॥प्राप्तो
गिरिवरस्तत्र गिरेःपूर्वेनदोत्तमः॥त्रिगव्यूत्यंतरेणास्तिपश्चिमेयोजनद्वये॥
जरत्कारुाश्रमंपुण्यंदृष्ट्वायांतिहरेःपदं॥सौमित्रेतत्रसंस्थित्वारामलीलां
मनोहरां॥६५॥अयोध्यांशरयूदृष्ट्वासदास्यान्मुदितोभृशं॥श्रुत्वेरितंमु
नेर्वाक्यंनत्वातंमुनिसत्तमं॥६६॥तमाज्ञापयतोश्रीमान्सौमित्रिर्विधि

वाचत्वंगदेवितत्रजगामासौवूर्णगिरिवरोत्तमे॥६७॥दृष्वासंपूजयामासगिरिं
कृत्वाप्रदक्षिणं॥आरुरोहगिरेर्मूर्द्धिंददर्शभूतलंमहत्॥६८॥सर्वभूवल
यंदृष्वामहन्मोदमनाभवत्॥सारदप्रभ्रवंदृष्वापीत्वातोयंमनोहरं॥६९॥
रामयज्ञास्यचरणंपश्यन्समभवोभवत्॥मत्स्यकूर्मादिकान्तत्वास्त्रा
त्वासर्वावरेषुच॥७०॥उत्तीर्य्यास्यांतरेदिव्यंस्थानंदृष्वातिहर्षितः॥तस्थौ

indianmanuscripts.com

तत्ररघुश्रेष्ठंध्यायन्सीतांशुभाननां॥७१॥ध्यायंतस्तन्मयोभूत्वामुमोचो
शुकलंमुहुःप्रमानंदोभसामग्नंदृष्ट्वावेदसुताशुभा॥७२॥बांधवान्निस
तातस्यसेवयन्चरणांबुजं॥ववाहेशमुखीदेवीशोणाप्राप्तामनोहरा७३
वेत्रवत्याःशोणभद्रसंगमेस्नानमात्रतः॥देविवेदमयोभूयाभात्रको
र्य्यविचारणा॥७४॥एकदादेविसोमित्रिप्रदोषेससखंप्रभुं॥शत्रुघ्नंभरतंस
र्वैवलवाहादिसंयुतं॥७५॥पुरबांधोपवनकंदृष्टंगच्छन्ददर्शह॥तन्माधुर्य्ये

indianmanuscripts.com

मयींलीलांपश्यन्तन्मयत्तामियात्॥७६॥रामांतिकसुखंस्मृत्वारुरोदशोक
संकुलः॥सोमित्रिरोदितंश्रुत्वाशोत्रोपिद्रवितोभृशं॥७७॥स्वस्वभावंपरि
त्यज्यशोत्रोपिकोमलान्तरः॥यभयत्रदिशापश्यतत्रतेत्यंतकोमलाः॥७८॥
अभवन्शोत्रजेतत्रनिवसन्योतिसद्गतिं॥गत्वाश्रीबोधयगिरिंनत्वादेवान्
जनार्द्दनान्॥७९॥देवावरेषुसंस्नात्वावेत्रवत्यस्शोत्रजं॥दृष्ट्वाक्षीरब्धि
पंवीरंलक्ष्मणोरामवल्लभं॥८०॥मुक्तास्वर्गसुखंपूर्णंविष्णुसायुज्यतांव्रजे

indianmanuscripts.com

त्॥पूजयेल्लक्ष्मणंयस्तुवेत्रवत्यांपितृन्यजेत्॥८१॥सगच्छेत्परमंस्थानंयङ्
त्वाननिर्वर्त्तते॥८२॥शिखरेवरुणद्रौचेच्छ्राद्धंकुर्य्याच्चसाधवे॥चतुर्वर्ग
फलंतस्यभवेन्नात्रविचारणा॥८३॥चंद्रस्यराजसूयाग्नौकुर्य्याच्छ्राद्धं
समाहितः॥एकोत्तरशतंकुलंयातिविष्णोःपरंपदं॥८४॥गोहत्याब्रह्म
हत्याचसुरापोगुरुतल्पकः॥चौरोवाभित्रघातोवास्त्रीणांग्रहस्तथैव
च॥८५॥सर्वैःप्रमुच्यतेपापैर्दृष्ट्वाश्रीलक्ष्मणंशुभं॥पूजनंकुरुतेया

indianmanuscripts.com

स्तुनियमेक्षीरशायिनः॥८५॥तस्यैश्वर्य्यसदानित्यंविजयंमंगलंशुभं॥
नारायणोमहाविष्णुर्लक्ष्मणोरामवल्लभः॥८७॥तस्यसंस्मरणाद्देवि
मंगलानिपदेपदे॥नाशुभंविद्यतेतस्यरक्षाबांधवशायिनं॥८८॥कारु
ण्याक्षेणयंवीरोलक्ष्मणोदेविपश्यति॥किंचिद्भद्रंतरंतस्यपश्याग्नि
भामिनि॥८९॥बांधवस्योत्तरेदेविसदातिष्ठंतिदेवताः॥तस्यपूजनमा
त्रेणपूजितास्युर्नसंशयः॥९०॥वैशाखस्यासितेपक्षेसप्तम्यांबाध

indianmanuscripts.com

वाचले॥पूजयेल्लक्ष्मणंदेवंसमुक्तोनात्रसंशयः॥२१॥वामभागेस्थितात
स्यबांधवीवरुणप्रिया॥तस्यासंस्पर्शनाद्देविनकोविदुखभाग्नरः॥२२॥विध्या
चलोदरान्नातो भूमिकेतुरिवोच्छ्रितः॥तत्रस्थित्वासुरास्सर्वेभूमिंपश्येतिसर्वतः
अगस्त्यायाचनाल्लिंचिद्भूरिःकुर्य्यादधोमुखं॥पंचाशद्योजनोच्छ्रायोबांधवो
नामपर्वतः॥२४॥कल्पोसुमोशलेग्रामेस्रवनोपवनामयाः॥बांधवस्योतिके
धर्मोब्राह्मणाःसंतिपार्वती॥२५॥शुद्धवंशामहादेविशुद्धधर्मासनातनाः॥

indianmanuscripts.com

वांद्रवस्योत्तरेस्नानेकलौप्रातानसंशयः॥९८॥माघस्यशुक्लपंचम्यांभग
स्त्याभगवान्ऋषिः॥स्नात्वावेभवतीतोयेपूजयेल्लक्ष्मणंसदा॥९७॥तद्दिनेस्नान
मात्रेणनरोनारायणोभवत॥येयेगिरिवरास्तत्रवांद्यवांतिकवासिनः॥९८॥
तेषांसंपूजनाद्देविकामनामाप्नुयान्नरः॥९९॥कार्त्तिकस्यासितेपक्षेनवम्यां
सनकादयः॥आगच्छंतिमहाभागाःसोमित्रेर्दर्शनायच॥तद्दिनेदर्शनाद्दे
विनमूयस्तनयोभवेत्॥१००॥नियमंकुरुतेदेविलक्ष्मणस्यांतिकेमहत्॥त

indianmanuscripts.com

स्यसिद्धिर्भवेच्छीघ्रंलक्ष्मणस्यप्रसादतः॥१०१॥पूजनंजपयज्ञंचस्तवयज्ञंत
थोमयं॥दानयज्ञंचयःकुर्य्यात्तस्यसिद्धिःपदेपदे॥२॥ब्रह्महत्यान्वितोय
स्तुगोहत्यान्वितविग्रहः॥दर्शनात्लक्ष्मणस्यास्महत्यामुक्तोतिपुण्यभाक्॥३॥
आरोहणंयेकुर्वंतिगिरेर्मुद्धिस्थतंहितं॥पदेपदेश्वमेधस्यशतकोटिफलं
लभेत्॥४॥महापुण्यतमाभूमिर्महापापप्रनाशिनी॥यत्रास्तेभगवा

indianmanuscripts.com

न्विस्मुः सौमित्रीरामवल्लभः॥ सूर्य्यचंद्रादयस्तत्रग्रहास्तस्योदराश्रिताः॥
दिक्पालालोकपालाश्चबांधवाश्चत्रकुक्षिगाः॥६॥ब्रह्मविस्मुस्त्रिशोदु
र्गागणेशोलोकमातरः॥तस्यमूर्द्धिस्थितानित्यंतीर्थावेदोदराश्रिताः॥७॥
वेदमंत्रास्तथासिद्धायंत्रमंत्रमयीक्रिया॥तस्यतोवेस्थितानित्यंवनानि
पार्श्ववर्तिनः८॥नास्तिबांधवतःपुण्यंनास्तिबांधवतःपरं॥नास्तिबां
धवतोदेविपवित्रंपापनाशनं॥९॥साक्षाद्देवमयोदेविवेदमंत्रक्रिया

indianmanuscripts.com

मयाः॥तीर्थाश्रममयादेवीदेवतानामयोगिरिः॥११०॥लक्ष्मणस्मरणात्पा
पंप्रलयंयात्यसंशयं॥क्रियासिध्यंतितस्याशुदुसाध्यादेवतैरपि॥११॥ईष
त्करात्क्षमात्रेणलक्ष्मणस्यमहेश्वरि॥संदग्धाद्धिर्दधौतस्मैरामायमार्गम्
त्तमं॥१२॥तस्मपूजनमात्रेणकिंचिन्नास्तीहदुर्लभं॥लक्ष्मणस्मरणेनैवत
स्यास्युस्सर्वदेवताः॥13॥ज्येष्ठेमासेशुक्लपक्षेचेत्पूजयेद्धावाचलं॥सर्वैश्वर्य्यं
प्रवृत्तस्यमंगलानिनिरंतरं॥१४॥पूजाविधिंशृणुष्वाद्यगिरेर्दैविवदामि

indianmanuscripts.com

ते॥गिरेःपूर्वदिशाधीशानग्निपूर्वान्तरस्थितं॥१५॥आग्नेयादिग्गजान्सर्वान्
याम्यमातृगणान्गिरेः॥अग्नियाम्यांतरेदुर्गांनैर्ऋत्यग्रहमंडलं॥१६॥
नैर्ऋत्ययाम्यमध्येतुगणेशंसिद्धिसंयुतं॥पश्चिमेलोकपालांश्चशोषंनै
र्ऋत्यवारुणे॥१७॥वायव्येसर्वदेवांश्चवायुंचारुणकेहरं॥उत्तरेपंच
देवांश्चमुनीनुत्तरायुके॥१८॥शेलांस्तीर्थान्नदीस्सर्वानैशानेबांधवस्य
च॥वेदमंत्रार्षिकान्सर्वान्सोम्यांतरेर्चयेत्॥१९॥ईशंपूर्वान्तरेदेवंगि

indianmanuscripts.com

रीक्षोवोधवाचलं॥पत्रपुष्पांकुरैर्धूपदीपनैवेद्यकैर्जलैः॥२०॥ध्वजापताका
भिःपूज्यप्रार्थनांकारयेत्सुनः॥गिरीद्रसर्वलोकेशसर्वप्राणप्रपालक॥
सङ्गत्यादेवदेवेशगिरिरूपिन्नमोस्तुते॥महाभूतपतेदेवगारुणीशनमो
स्तुते॥२१॥त्वयेतत्पाल्यतेविश्वंत्वत्सृज्यंसृज्यतेविधिः॥सर्वेषांप्राण
रूपोसिवांधवायनमोस्तुते॥२२॥एवंस्तुत्वागिरेर्मुद्रिंवाराहंवामनं
विभुं॥नरसिंहंभार्गवंमत्स्यंकूर्मरुद्रंसशक्तिकान॥२३॥संपूज्यराघ

indianmanuscripts.com

वंपश्चाल क्ष्मलं शक्तिसंयुतं॥ भक्ष्यभोज्येस्तथालेह्यैश्चोष्यैर्दिव्यैर्वरैः शुभैः॥
पूजयेद्दूलनाथं च पश्चाद्विप्रान्सुभोजयेत॥ प्रक्षिणादिप्रदातव्या विप्रादिभ्यो
यथार्हतः॥२६॥ एवंयः पूजयेद्दूवितस्यपूर्णमनोरथं॥ यद्यच्चितयतेरातत्तत्
लीमवाप्नुयात॥२७॥ विजयंविजयंभूतिर्मंगलंमंगलंसुखं॥ गिरेस्तस्मर
णाद्दूविसर्वासुखमयादिशः॥२८॥ तद्राष्ट्रंमंडलंदेशोराष्ट्रंतेषांपुरेषुच॥
वनेषुपवनेनद्यांगिरौन्दूलंसुमंगलं॥२९॥ वंशवृद्धिस्सुखंधान्यंसर्वं

indianmanuscripts.com

श्वर्य्यधनादिकं॥इहलोके सुखंभुक्त्वा प्रजास्तस्यातिनिर्भयाः॥१३०॥या
स्येतिपरमंस्थानंयंगत्वानानिवर्त्तते॥१३१॥इतिश्रीनारदपंचरात्रांतरगत
शिवसंहितायांभूगोलवर्णनेशिवपार्वतीसंवादेबांधवमाहात्म्येस
प्तासीतितमोध्यायः॥१॥श्रीपार्वत्युवाच॥श्रुतंमाहात्म्यंमतुलंबांध
वस्यमहेश्वर॥तत्रस्थलक्ष्मणास्याद्यसेतिहासार्चनंवदा॥१॥श्राणुदेवि
कथांपुण्यांपूजामाहात्म्यसंयुतां॥वक्ष्यामितत्वतोदेविसर्वसौभाग्यदाय

indianmanuscripts.com

कां॥२॥कश्चित्का स्यांद्विजोवात्सीन्महातेजाति धार्मिकः॥क्रियाकांडवि
शेषज्ञःदेवतातिथिपूजक॥३॥सुधर्म इतिविख्यातोलोकापुज्योतिसील
वान्॥तस्यासौभुवनाकाजाताधार्मिकाःशीलसंयुताः॥४॥महाविद्यान्विता
स्तेतुशप्तावि प्रर्षिनाशुभे॥कुक्कुरेनप्रनष्टास्तेदैवयोगेनभामिनि॥५॥कु
क्कुरोभूमिभागेतुगंगातीरेधनुस्त्रयं॥खनित्वातस्यचद्वारंपिधायतपसि
स्थितः॥६॥वहुकालगतंतत्र विप्रेतपसिसंस्थिते॥खनेयुर्विप्रकास्तत्र

indianmanuscripts.com

तस्यांगेशाल्यमेदितः॥७॥ बहुस्रुश्रावरुधिरंदृष्टाविप्रसुतान्स्थितान्॥तपसाभ
स्मसात्कुर्य्यात्पुत्रहीनोद्विजोभवत॥८॥ महादुःखेनसंतप्तोवभ्रमसकलंजगत॥
एकदावनमध्येसोददर्शपर्वतंमुनिं॥९॥प्रणम्यतेनसंपृष्टोदुःखितोसिकुतोद्वि
ज॥सुधर्मस्तुतदाश्रुत्वापर्वतस्यसुभाषितं॥१०॥कथयामासवृत्तांतंदुःखंत
स्मैन्यवेदयत॥श्रुत्वावाक्यंसुधर्मस्यपर्वतोवाक्यमब्रवीत॥११॥त्वंगच्छवां
धवंविप्रतत्रराजानुजंप्रभुं॥पूजयासुप्रदद्यातेपुत्रान्धनसंयुतान्॥१२॥

indianmanuscripts.com

कुत्रास्तिपर्वतश्रेष्ठोलक्ष्मणोस्तिकुतोमुने।।तस्यपूजार्चविधानंमेसांगंवदमहा
मुने।।१३।।सुधर्मवचनंश्रुत्वापर्वतोवाक्यमब्रवीत।।श्रृणुविप्रवरंस्वर्हिका
स्थानेऽस्त्यदूरके।।१४।।विंशद्योजनमानेनलक्ष्मणस्याचलोद्विज।।प्र
यागस्यतथायाम्येनैऋत्यस्यान्तरेगिरिः।।१५।।षोडषयोजनांतेचुरेवायाःशुभुको
नके।।नवयोजनमानेनशोणस्यपश्चिमेतरे।।१६।।त्रिगव्यूत्यंतरेब्रह्मन्धा
धवोनामपर्वतः।।सएववरुणःसाक्षाच्छ्वेतोपर्वतरूपधृक्।।१७।।तत्रो

indianmanuscripts.com

स्तत्रलक्ष्मलोरामवल्लभोविष्णुरूपधक्॥सखीकोटिशतैर्युक्ताचोर्मिलातंप्र
पूजयेत्॥१८॥तस्याश्चार्थेराजवेशंभाधवोदरकेप्रभुःधत्वाविहारमगम
सदासखिग्रलोर्द्विज॥१९॥तत्रगच्छरघुश्रेष्ठंबांधवैःशक्तिभिस्सह॥पू
जयस्वमहाभागंतूर्णंतेस्युर्मनोरथाः॥२०॥पूजाविधिंवदाम्यस्यनरस्य
णायच्छुतंद्विज॥कदाचिद्ब्रह्मलोकेगतोहंनारदेनच॥२१॥दृष्ट्वा

indianmanuscripts.com

विप्रगणैर्दैवैर्ब्रह्माणंलोकपूजितं॥ प्रणम्यपूजयित्वातंनिशासदसभां
तरे॥२१॥तत्रैकोब्रह्मणोभ्यागाच्छुक्रदेतेतिविश्रुतः॥तपस्वीज्ञान
संपन्नोमहातेजातिधार्मिकः॥२३॥द्विजान्देवगणैर्नत्वाब्रह्माणंप्र
णिपत्यच॥पृष्टोसौविधिनाविप्रोनत्वाप्रोवाचसादरं॥२२॥पुत्रार्थे
हंसमायातस्तत्वंदेहिपितामह॥श्रुत्वाविचार्य्यप्रोवाचब्रह्माभुक्ता
यधर्मिणे॥२५॥नतेपुत्रेणसंबंधोजन्मायुतशतैरपि॥नतेपुत्रो

indianmanuscripts.com

भवेद्विद्यन्नजन्मसाहस्रकेशुचा॥२८॥यदैतद्ब्रह्मणाप्रोक्तोदुखितोतीव
विह्वलः॥दुखितंब्राह्मणंदृष्ट्वादयादीभृगुरब्रवीत॥२९॥त्वंगच्छवांध
वंशुक्लतीर्थंलक्ष्मणासंवितं॥तस्यसंसेवयाविप्रभवेयुस्तेमनोरथाः॥
केनप्रकारेणमुनेसेनयेहंरघूत्तमं॥तद्वदस्वमहाभागश्रुत्वाभृगुरु
वाचह॥३०॥विध्यनाभ्यंतराजातोवाधवोवरुणाचलः॥तत्रश्री
लक्ष्मणंविष्णुरूपिणंपूजयेत्सदा॥३०॥चैत्रेमासेसितेपक्षेवैशा

indianmanuscripts.com

खेवास्तितेतरे॥नवम्यांराघवंदेवंपूजयेत्सुसमाहितः॥सशक्तिकैरी
घवैर्देवैप्यूनयेन्द्रक्ष्यकैर्शुभैः॥वरंसंप्रार्थयेत्तत्रसर्वसिद्धिस्तदा
भवेत॥३२॥रामानुजसमोनास्तिकृपालुर्दीनवत्सलः॥लक्ष्मणद्वितरो
नास्तिदुर्लभप्रदभूलके॥३३॥पुत्रस्नेस्यान्नसंदेहोनात्रकार्य्यविचारणा
नकालस्यनदैवस्यकर्मणगुणभावतः॥३४॥गतिर्नास्तिमहाभागलक्ष्म
णस्मरणंयतः॥सत्वंतत्रगुणंतत्रभागंतत्रद्विजोत्तम॥३५॥सत्वंतत्रसु

indianmanuscripts.com

खंतत्रफल्गुतत्रनिरंतरं॥यत्रयत्रमहाराजलक्ष्मणंस्मरणंहितं॥लक्ष्मणस्म
रणात्सिद्धिसर्वदाहिपदेपदे॥सुधर्माभृगुणाश्रुत्वाशुक्लोरामानुजार्चनं॥
चकारतत्रशुक्लोसौप्राप्तवान्पुत्रमुत्तमं॥पृथुग्रीवेतिविख्यातोद्विजःशु
क्लसुतोमहान्॥३८॥तस्मात्कुरुद्विजश्रेष्ठबांधवाश्चत्रवासिनः॥लक्ष्म
णस्यशुभांपूजांसत्यंतेस्यामनोरथं॥श्रुत्वामुनिवरस्यासौनाकंद्विज
वरशुभोऽचकारसेवनंतत्रसोमित्रेःपर्वतोत्तमे॥४०॥महादेविसुधर्मे

indianmanuscripts.com

स्यप्राप्तापुत्रामृतास्तुये॥निसृताग्निमुखाश्चाष्टौसौमित्रेर्वरदानतः॥४१॥
लब्ध्वामृतसुताविप्रोलक्ष्मणस्यप्रभावतः॥महाधनादिकंलब्ध्वाशांतेराम
पुरेव्रजेत्॥४२॥इत्येतत्कथितंदेविमाहात्म्यंबांधवस्यच॥यश्चैनांतिम्र
हापुण्यंसर्वपापैःप्रमुच्यते॥४३॥धनार्थीधनमाप्नोतिपुत्रार्थिपुत्रमाप्नु
यात्॥कुरोगीमुच्यतेरोगाद्राज्यंराज्यच्युतोनरः॥४४॥पापीपापात्प्रमुच्य
तेश्रुत्वामाहात्म्यमुत्तमं॥४५॥इतिश्रीनारदपंचरात्रेज्ञानामृतसारेशिवसंहिता

indianmanuscripts.com

ॐभूमोत्वर्णनेश्रीपार्वतीसंवादेऽयोध्यामाहात्म्यप्रश्नसीतसमोध्या
यः॥१॥श्रीपार्वत्युवाच॥ भवतावर्णितंसर्वंमाहात्म्यंपरमाद्भुतं॥श्रुतंनोतृप्ति
मायातिमनोमेदेवसत्तम॥१॥सोमित्रेपर्वतस्थस्यअन्यान्यपिशुभानि
भो॥चरितानिमहादेवदस्यकरुणानिधे॥२॥अस्तुदेविकथांपुण्यांस
र्वपापप्रनाशिनीयांश्रुत्वासर्वपापेभ्योमुक्तोभवतिमानवः॥३॥एक
दारामचंदस्तुअयोध्यायांसभांतरे॥विप्रवंधुगणैस्तत्रप्रविवेशार

indianmanuscripts.com

धूत्तमः॥४॥वशिष्ठपौत्रोभगवान्शक्तिपुत्रःपराशरः॥सर्वतीर्थाटनं
कृत्वाघाजगामप्रसभांशुभे॥५॥दृष्ट्वामुनिवरंरामोगुरुपौत्रंप्रतापिनं॥
उत्थाप्याशुसभामिश्चपूजयामासधर्मवित्॥६॥सर्वैपिचारैःसंपूज्यन
त्वास्तुत्यकृतांजलिः॥पप्रच्छभोमुनिश्रेष्ठसर्वतीर्थाटनंत्वया॥७॥कृ
तंदीर्घेनकालेनविधियुक्तंसमाहितःयानिचोत्तमक्षेत्राणितीर्था
निविविधानिच॥८॥नदीश्चरासिद्दृष्टानितेषुयत्सर्वदर्शक॥पुण्यंमनोरम

indianmanuscripts.com

दिव्यंतद्वदस्वमुनीश्वर॥९॥रामेरितंमुनिश्रेष्ठोविचिंत्योवाचसादरंराजन्स
र्वंशितीर्थानिदृष्ट्वासंतिमनोरमः॥१०॥बांधवाचलसंस्पर्शान्मनोमेति
प्रसीदति॥तत्रदुग्धाब्धिपंदेवंशेषास्रुंजगत्पतिं॥११॥दृष्ट्वातत्रस्थि
तोभूमिंसर्वांगिरिवनान्वितां॥विलोक्यातिमनोहृष्टंयातिशांतिंनरपो
त्तम॥१२॥मुनीरितंततश्रुत्वारामोवाक्यमुवाचह॥मुनेकुत्रास्तितीं
र्थंयत्पवित्रंपापनाशनं॥१३॥बांधवाद्रिस्थितोयत्रयत्रनारायणो

indianmanuscripts.com

हरिः॥श्रुत्वारामेरितंवाक्यंशात्रुघ्नोऽब्रवीद्वचः॥१४॥पंचविंशद्योजना
स्तेअयोध्यायास्तुदक्षिणेबांधवाचलनिख्यातोयत्रनारायणःप्रभुः॥
दृष्ट्वाश्रीपर्वतश्रेष्ठंपूजयित्वाजनार्दनं॥पीत्वावेत्रवतीतोयंपूतात्मायति
विस्मृतां॥१५॥तदंतरेमहातेजाविश्वामित्रोब्रवीद्वचः राजन्बाधवसं
स्थायीलक्ष्मणोविष्णुरूपधक्॥१७॥त्वद्दर्शनायसंप्राप्तेस्तत्कार्ज
तानुंप्रभो॥त्वयात्यक्तोरघुश्रेष्ठलक्ष्मणःशरयूजले॥१८॥अंतर्धो

indianmanuscripts.com

यतनुंरामस्यस्वरूपंसमागतः॥क्षीरशायीमहाविष्णुर्लक्ष्मणोयंतवा
नुजः॥१९॥तवसंदर्शनार्थायगोतमात्पर्वतंययौ॥तत्रस्थितेमहारा
जदर्शितासकलामही॥२०॥अत्यद्भुतिमहापुण्योमहापापप्रनाश
नः॥त्वद्बुधवःशेशशायीत्वांध्यायंस्तत्रसंस्थितः॥२१॥अयोध्यो
शरयूंरामत्वांत्वद्बुधून्स्वमित्रकान्॥पश्यन्नंतिकवत्सर्वांत्वन्मयः
स्यात्सदैवहि॥२२॥इतिश्रुत्वारघुश्रेष्ठोदुखार्त्तोतिवविह्वलः॥विललापा

indianmanuscripts.com

तिदुखेनदेविरामाविमूर्छितः॥२३॥बोधयामासतंरामंविश्वामित्रोमहामुनिः॥
तंदृष्ट्वात्वरितोदेविवाहनैर्बाधर्वैर्द्विजैः॥२४॥अयोध्यावासिभिःसर्वैर्ययोप
र्वतसत्तमं॥मार्गस्थानिचतीर्थानिनदीगिरिसरांसिच॥२५॥पश्यन्त्रामोर
घुश्रेष्ठोबांधवंवरुणाचलं॥तीर्थयात्राविधिंतत्रकृत्वातीर्थानिसंस्पृश
न्॥२६॥गिरिंप्रदक्षिणंकुर्य्यात्पूजयित्वागिरिंशुभे॥आरुरोहगिरिंस
वैस्तत्रविप्रंसनातनं॥२७॥शोषस्थंपूजयामाससंस्तुत्यस्तुतिभिर्मुदा॥

indianmanuscripts.com

विश्वामित्रेणसोमित्रिंतत्वातत्रमनोगतं॥२८॥तप्तचामीकराभासंकंबुकंठं
सुनासिकं॥वक्त्रभ्रुवंरपस्कंधंसुहनुंससस्मितंमुखं॥२९॥आकर्णक्षंगूढ
जत्रुंवृहद्वक्षस्थलंशुभं॥तनंवोदरंसुस्थिरसंसुकर्णकमलेक्षणं॥३०॥अ
तिछिन्नकरिन्नागकरोरुंसुतत्वारकं॥सुस्निग्धकुंचितंकेशंकाकपक्ष
धरंविभुं॥३१॥आजानुवाहुंसुगतिंसुकंपोलमनोहरं॥नीलस्निग्धोव
रंरक्तकंजोष्ठंकमलाधरं॥३२॥रक्तकंजकरंरक्तपादंदिव्यांगुलिशुभं॥सु

indianmanuscripts.com

कुंडलंमहादिव्यंकरकैरंगुलीयकैः॥३३॥अंगदाभ्यांचैजयंत्यामालयामेखला
द्विभिः॥सोवर्णीकंठिकाभिश्चशोभितंवन्यमालया॥३४॥सुपीतंचसो
क्ष्मीषंसत्पटंसधनुष्करः॥सशरंस्फुरदंभ्रूंसुनखंचमनोहरं॥३५॥गं
भीरनाभिंदिव्यागंपश्यन्स्मितमग्रतः॥मेघगंभीरवचनंमस्तकांज
लिकंविभुं॥३६॥ध्यायन्रामानुजंतत्रतन्मयोतीवविह्वलः॥मुंचन्न

indianmanuscripts.com

श्रुकलांदेविनपश्येत्स्वपरंविभुः॥३७॥तन्मयोलक्ष्मणंपश्यन्तलक्ष्मणो
पिचतन्मयः॥परिष्वज्यमुदायुक्तोविस्मृतस्वतनोर्गतिः॥३८॥प्रबुद्धलक्ष्म
णोरामंसस्मसंधंप्रतापिनं॥ज्ञात्वाचान्तर्दधेतंपुनर्विस्मुस्मरूपकः॥
रामोपिलक्ष्मणंनेवपुनःपश्येद्यदातदात्रिमासंबोधवेस्थित्वाभरतादि
भिरन्वितः॥४०॥यज्ञंचकारतन्मूर्द्धिसंतर्प्यपितृदेवतान्॥ततो

indianmanuscripts.com

दृष्ट्वामहीं सर्वीस्नात्वावेत्रवतीजले॥४१॥शोणभद्रेपुनःस्नात्वामार्क
ंडेयंतथार्चयेत्॥अयोध्यांचपुनर्गत्वाध्यायन्रामोगिरिंशुभं॥४२॥
माहात्म्यंगिरिराजस्यवसतेर्लक्ष्मणस्यच॥वर्णयन्मुनिभिस्तत्र
वर्णितंमुदमावहः॥४३॥अथान्यदपिदेवेशिश्रृणुष्वावहितशुभे॥सो
मित्रेर्दिविमाहात्म्यंसर्वलोकेषुविश्रुतं॥४४॥देविदेवेश्वरोद्देवै

indianmanuscripts.com

र्वचः॥ विचिंत्यतत्रदेवान्हि गौतमोवाक्यमब्रवीत्॥ ५३॥ देवगच्छतशीघ्रंहि गि
रीशंवांधवाचलंतत्ररामानुजोदेवोलक्ष्मणस्तंसमर्चयेत्॥ ५४॥ पंचरत्नंम
यादत्तंस्तोत्रंपठततत्रवै॥ शीघ्रंमनोरथंसिद्धंसर्वैश्वर्य्यसुरोत्तमाः॥ ५५॥
श्रृणुध्वंकथयिष्यामिस्तोत्रंरामानुजस्यहि॥ यत्स्मरणात्सर्वदुखेभ्योमु
क्तोभवतिमानवः॥ ५६॥ गौतमउवाचकाकुत्स्थकरुणामूर्त्तेमहाराजा
नुजप्रभो॥ त्राहित्राहिमहाभागशरणागतवत्सल॥ ५७॥ भक्तप्रियमहाग

indianmanuscripts.com

जकुमारामिततेजसेतुभ्यंनमोस्तुदेवेशपूजितायनमोनमः॥४॥श्री
शुद्धाग्रजसोमित्रेशत्रुहंत्रेप्रतापिने॥यशस्विनेगुणज्ञायनमस्तस्मै
नमोनमः॥५॥महाविष्णुस्वरूपायमहाविद्याविधायिने॥जगत्प्रो
णायदेवेंद्रपालकायनमोनमः॥६॥शरण्यायनरेंद्रायरामप्राणप्रिया
यच॥दाशरथायसौम्यायनमस्तुभ्यंरघूत्तम॥७॥इतिश्रीराघवेंद्रस्य
स्तोत्रंशंभोःश्रुतंमया॥तत्रेदंपठतस्तोत्रंबांधवेश्वरसत्तमाः॥८॥

indianmanuscripts.com

यथेष्टं सर्वसौभाग्यं विजयं मंगलं शुभं ॥ भविष्यति न संदेहो देवागच्छत तत्र वै ॥
जग्मुर्देवा बांधवेते सोऽग्निं पूज्य संस्तवैः ॥ स्तुतिं च कुप्रसन्नस्तान्वरं दत्वा
यथेप्सितं ॥ ६७ ॥ निसार्ण्य च जलेरत्नं देवेभ्यो सो समर्पयत् ॥ ततः प्रभृति
देवास्तु जोतमो रुस्तवेन च ॥ ६४ ॥ पूजयित्वा तिरघुश्रेष्ठं बांधवाश्च लघास्तिवा
येपश्यंतितदादेवंते सर्वे प्सितभागिनः ॥ ६५ ॥ नारद उवाच ॥ मुनयः श्रोत
हेशास्य वाक्यमाहात्म्यसंयुतं अद्भुतं चातुलं श्रुत्वा मुदमाप प्रीतिया ॥ ६६

येश्रृण्वंतिपठंतीदंमाहात्म्यंवांधवस्यचैतेनसर्वंलभंतेप्राप्यवास्येतिवर्
मोगतिं॥६७॥लक्ष्मणस्याचलेतस्यपुरतोयेपठंतिहि॥वांधवाश्चलभा
स्यंतेवैयांतिहरेःपदं॥६८॥इतिनारदपंचरात्रांतर्गतेश्रीशिवसंहिता
यांभृगोलक्ष्मणेनशिवपार्वतीसंवादेवांधवाचलमाहात्म्यनामाशीतितमो
ध्यायः॥८०॥

indianmanuscripts.com